International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 99-101
© 2018 IJSR
www.anantaajournal.com
Received: 22-05-2018
Accepted: 24-06-2018

**डॉ. अनीता कुमारी**
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

**Correspondence**
**डॉ. अनीता कुमारी**
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

# प्रत्यय–विमर्शः

**डॉ. अनीता कुमारी**

**प्रस्तावना**

सकलशब्दमूलभूता धातवो हि क्रियावाचिनो भवन्ति। धातुभ्यो द्विविधाः प्रत्ययाः भवन्ति तिङःकृताश्च। तत्र कृत्प्रत्यया येषामन्ते भवन्ति ते कृदन्ताः शब्दाः नामशब्दाः भवन्ति।

धातवो द्विविधाः– औपदेशिकाः, आतिदेशिकाश्चेति। धातुपाठे पाणिनिना साक्षात् पठिताः औपदेशिकाः। 'सनाद्यन्ता धातवः'[1] इति सूत्रबोधितधातुसंज्ञकाः, यथा–

सन् क्यच् काम्यच् क्यङ् क्यषोऽथाचारक्विब् णिज्यङौ तथा।
यमाय ईयङ् णिङ् चेति द्वादशामी सनादयः।।

इत्युक्ताः सनादिप्रत्ययान्ताः द्वादश आतिदेशिकाः। तेषु णिच्, सन्, यङन्तास्त्रय एवात्र कृत्प्रत्ययप्रकृतित्वेनोपात्ताः। यद्यपि क्यजाद्यन्तेभ्योऽपि धातुभ्यः एते साधारणाः कृत्प्रत्यया भवितुमर्हन्ति यथा–पुत्रीयकः, पुत्रीयिता, पुत्रकाम्यकः, पुत्रकाम्या इति, तथापि क्यजादीनां सुबन्तप्रातिपदिकप्रकृतिकत्वेन तेषामानन्त्यात्, तेभ्य कृतप्रत्ययप्रदर्शनं दुस्साधमिति।

आचार्यः तत्तद्धातुषु अकाराद्यनुबन्धकरणेन कार्यविशेषं प्रतिपादयति। यथा–'एध वृद्धौ' इत्यादिषु अनुदात्ताकारस्यानुबन्धस्य करणेन, 'ईङ् गतौ' इत्यादिषु ङकारस्यानुबन्धस्य करणेन च 'अनुदात्तङित आत्मनेपदम्'[2] इति शानच्–प्रत्ययं शास्ति–एधमानः, अयमानः इति शानचर्थम्। एवम् 'अल गत्यादिषु' इत्यादिषु अकारस्य स्वरितत्वप्रतिज्ञानेन, 'ऊर्णुञ् आच्छादने' इत्यादिषु ञकारस्येत्संज्ञासम्पादनेन च, 'स्वरितञितः कर्त्रभिप्राये क्रियाफले'[3] इति सूत्रेण विवक्षाभेदेन आत्मनेपदं परस्मैपदं च शास्ति। एवमाकारादीनां वर्णानां, ञि टु डु इत्येतेषामनुबन्धानां करणेन कार्यविशेषं तत्र तत्र प्रतिपादयति।

धातोरर्थनिर्देशः बालमनोरमामुद्रालयमुद्रितधातुपाठकोशमवलम्ब्य कर्त्तव्यः। तत्र प्रसिद्धिप्राचुर्यात् धात्वर्थ एको निर्दिष्टः। धातूनामनेकार्थत्वात्, प्रामाणिकाः अन्ये अप्यर्थाः ज्ञेयाः। अत एव भाष्ये 'अग्नौ परिचाय्योपचाय्यसमूह्याः'[4] इत्यत्र 'ऊहिरपि वह्यर्थे वर्तते। कथं पुनरन्यो नामान्यस्यार्थे वर्तते ? कथमूहिर्वह्यर्थे वर्तते ? बह्वर्था अपि धातवो भवन्ति।' इत्युक्तम्। 'सेधतेर्गतौ'[5] इत्यत्र गतिग्रहणम्, .................'गुद क्रीडायामेव' इत्यत्र एवकारग्रहणम् इत्यादिकं धातूनामनेकार्थत्वे लिङ्गम्। एतत्सर्वमभिप्रेत्यैव –

धातोश्चोपसर्गाश्च निपाताश्चेति ते त्रयः।
अनेकार्थाः स्मृता प्राज्ञैः पाठस्तेषां निदर्शनम्।।
इत्यभियुक्तेरुक्तम्।

क्वचित्–सामान्यतः अर्थनिर्देशे कृतेऽपि, अर्थविशेषे एव पर्यवसाने भवति। अत एव सत्यपि हि शब्दार्थत्वे नियते एवैषामभिधेयम्। तथा हि–'कवतिस्तावदव्यक्ते शब्दे वर्तते–उष्ट्र काकूयते इति। कुवतिरप्यार्त्तस्वरे वर्तते–चोकूयते वृषल इति। पीडित इत्यर्थः कौतिस्तु शब्दमात्रे।' इति 'न कवतेर्यङि'[6] इत्यत्र न्यासे प्रोक्तं सङ्गच्छते। तद्यथा–

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
बिहाराहारसंहारप्रहारपरिहारवत्।।

इत्युक्तरीत्यापि धातूनां नानार्थत्वे स्वयमेव यथायथमूहयम्। यथा–प्रमाणमेतादृशार्थानामपि ग्रन्थेऽत्र प्रदर्शनं भविष्यति।

अर्थभेदेन उपसर्गसमभिव्याहारेण च धातो सकर्मकत्वमकर्मत्वं च भवति। यथा–भूधातुरकर्मकोऽपि सुखमनुभवति इत्यत्रोपसर्गसमभिव्याहारात् सकर्मको भवति। एवं जिधातुः पराभवार्थे सकर्मकः शत्रून् जयति इति, जयार्थे अकर्मक–देवदत्तो जयति इति। अतश्च सामान्यतः धातुपाठकोशेषु योऽर्थः प्रदर्शितः, तस्मिन्नर्थे तस्य धातोः कर्मान्वययोग्यतायां सकर्मकत्वम्, नो चेदकर्मकत्वम् इत्याशयेनात्र सकर्मकत्वमकर्मकत्वं च प्रदर्शितमित्यपि ज्ञेयम्।

धातवः सेटः, अनिटः, विकल्पितेटश्चेति त्रिधा भिन्नाः। सेटोऽपि धातोः कुत्रचित् प्रत्ययेषु इण्णिषेधः, इड्विकल्पश्च भवति। अनिटोऽपि धातोः प्रत्ययविशेषे क्वचिदिड्विधीयते।

परस्मैपदात्सेनपदोभयपदित्वेन धातवो भिन्नाः। तत्र परस्मैपदिनोऽपि धातोः उपसर्गवशात् अर्थविशेषनिमित्ताच्च आत्मनेपदं भवति यथा–जिधातुः स्वयं परस्मैपद्यपि 'विपराभ्यां जेः'[7] इति शास्त्रात् वि–परा–पूर्वकत्वे आत्मनेपदी भवति–विजयमानः, पराजयमानः इति। एवं आत्मनेपदिनोऽपि धातोः परस्मैपदं भवति, यथा–रमुधातुरात्मनेपदी, तस्य 'व्याङ्परिभ्यो रमः'[8] इति शास्त्रात् परस्मैपदं, शता–भवति विरमन् इति।

दशस्वपि विकरणेषु अन्तर्गणाः कार्यविशेषार्थं निर्दिष्टाः। तेषां प्रयोजनमपि तत्तद्धातुषु प्रमाणोपन्यासेन प्रदर्शितम्। यथा–भ्वादिषु घटादयः इति केचन धातवः पठिताः। तेषां फलं तु–'घटादयो मितः' (गणसूत्रं भ्वादौ) इति मित्संज्ञा। मित्संज्ञाफलं तु–'मितां "सवः'[9] इति उपधा"स्वः। यथा–घटकः इत्यत्र ण्यन्ताण्ण्वुलि णिज्निमित्तक उपधा"स्वो भवति। एवमादयोऽन्तर्गणाः प्रायः सर्वेष्वपि विकरणेषु सन्ति। तत्र कृदन्त–प्रकरणेषूपयुक्तानामेवान्तर्गणानामस्माभिः प्रदर्शनं करिष्यते नान्येषाम्। 'रूदादिभ्यः सार्वधातुके'[10] इत्यत्रेपात्तस्य रूदादिरूपादादिकावान्तर्गणस्य कृदन्तरूपेष्वनुपयुक्ततया नात्रेपादानम् इत्यादिक यथायथमूहयम्।

देवनाम्नाप्राचीनवैयाकरणेन एकस्मिन् गणे, भिन्नेषु गणेषु वा पठितानां सरूपाणाम्, अंशतो भिन्नानां च धातूनां पुनः पाठस्य प्रयोजनप्रदर्शनार्थ श्लोकरूपः कश्चन ग्रन्थो निर्मितः यस्य ग्रन्थस्य वैयाकरणनिकाये 'दैवम्' इत्याख्या। यथा–

पठितस्य पुनः पाठे फलं वृत्तेन वक्ष्यते।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम्।।
दाञो दत्ते ददातीति दाणो यच्छति दो द्यति।
दाति दायति दाप्दैपोः दयते रक्षणे ङितः।।

ग्रन्थस्यास्य श्रीकृष्णलीलाशुकमुनिविरचिता पुरुषकारवार्तिकाख्या व्याख्या वर्तते–यत्र च बहवोऽपूर्वांशाः प्रतिपादिता।

पाणिनिना 'भू सत्तायाम्' इत्यारभ्य 'बहुलम्, एतन्निदर्शनम्' इत्यन्ते धातुपाठे दशस्वपि गणेषु प्रायो द्विसहस्रसंख्याका धातवो निर्दिष्टाः। तेभ्यः सर्वेभ्यः कर्तृकर्मभावादिष्वर्थेषु विहिताः कृत्प्रत्ययाः प्रायेण त्रिंशदधिकशतसंख्याका उपलभ्यन्ते। ते सर्वेऽपि न सर्वेभ्यो धातुभ्यो भवन्ति। धातुत्वव्याप्यनिमित्तकाः केचन युजादयः प्रत्ययाः–ते यथा 'चलनशब्दार्थादकर्मकाद् युच्'[11] इत्यादयः। अन्ये केचन धातुस्वरूपोपादानेन विहिताः यथा–'हस्तेरनुद्यमनेऽच्'[12] इत्यादयः।

सूत्रपाठक्रमे यद्यपि 'धातोः'[13] इत्यनन्तरं तव्यदादयः कृत्प्रत्यया एव प्रकान्ताः। तथापि कर्तृवाचकानां ण्वुलादीनां प्राथम्यमाश्रितम्।तत्र निदानं तु–सकर्मकाकर्मकसाधारण्येन धातुमात्रात् 'कर्तरि कृत्'[14] इत्यनुशासनेन ण्वुलादीनां विधानात् तस्य व्यापकत्वेन प्राधान्यमिति। अनन्तरं भावकर्मार्थकप्रत्ययानाम्, तदनु भावाद्यर्थकानां घञादीनाम्, अन्ते अव्यय–संज्ञायोग्यानाम् तुमुनादीनां च निवेशः। उणादीनां कुत्रचिदेव प्रदर्शनात्, तेषामन्ते निवेशः।

ण्वुलन्तेन 'ण्वुल्तृचौ'[15] 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्'[16] 'रोगाख्यायां ण्वुल् बहुलम्'[17] धात्वर्थनिर्देशे ण्वुल् वाच्यः[18], संज्ञायाम्[19] इत्यादनां तन्त्रेण निर्देशो ज्ञेयः। एवम् तृजन्तेन पदेन तच्छीलाद्यधिकारे 'तृन्'[20] इतिसूत्रेण विहितस्य तृन्नन्तस्यापि ग्रहणं ज्ञेयम्। शानजन्तेन 'ताच्छील्यवयोवचनशक्तिषु चानश्'[21] इति विहितस्यापि ग्रहणम्। क्तान्तेन पदेन 'निष्ठा'[22] 'आदिकर्मणि क्तः कर्तरि च'[23] 'गत्यर्थाकर्मक––'[24] 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः'[25] 'नपुंसके भावे क्तः'[26] इति विहितानां तन्त्रेण निर्देशः। क्तवत्वन्तेन पदेन 'निष्ठा'[27] 'आदिकर्मणि निष्ठा वक्तव्या[28] इति विहितयोर्ग्रहणम्। तुमुन्नन्तेन 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्'[29] 'समानकर्तृकेष तुमुन्'[30] 'कालसमयवेलासु तुमुन्'[31] इति विहितानां ग्रहणम्। एतेषां प्रत्यकेमर्थः, कालः इत्यादिक भिद्यते एव।

ण्वुल्, तृच्, शतृ, शानच्, क्विप्, क्तक्तवतू, पचाद्यच्, इत्याद्याः प्रायः 'कर्तरि कृत्'[32] इत्यनुशासनात् कर्तरि भवन्ति। तव्यत्, अनीयर्, ण्यत् (यत्), खल् (यक्) (क्वचित् क्यप्रत्ययोऽपि) इत्यादयः प्रत्ययाः 'तयोरेव कृत्यक्तखलर्थाः'[33] इति वचनात् सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यो भावे च भवन्ति। घञ्, क्तिन्, अप्, अच्, अकारप्रत्ययः इत्यादयः भावे कर्तरि च कारकादौ भवन्ति। तुमुन्, क्तवा, (ल्यप्) क्त्वाणमुलौ इत्येते प्रत्ययाः 'अव्ययकृते भावे' (भाष्येष्टिः) इति वाचनात् भावे भवन्ति।

शत्रन्तात् स्त्रियाम्, 'उगितश्च'[34] इति ङीपि नुमागमप्रवृत्तौ द्वाभ्यां सूत्राभ्यां पाणिनिर्निर्णयमकरोत्, तद्यथा– 'शप्श्यनोर्नित्यम्'[35] इति भ्वादिदिवादिगणपठित–धातुप्रकृतिकशत्रन्तानां नित्यं नुम्–भवन्ती,

दीव्यन्ती इति। तुदादिगणपठितानां, अदादौ आकारान्तधातूनां च 'आच्छीनद्योर्नुम्'[36] इति वा नुम्–तुदती–तुदन्ती, याती–यान्ती इति। अन्येषां षण्णां शत्रन्तानां नुमागमो नैव भवति। यथा–श्वसती (अदादौ), दधती (जुहोत्यादौ) सुन्वती (स्वादौ), कुर्वती (तनादौ), रून्धती (रूधादौ), क्रीणती (क्र्यादौ) इति। चुरादीनां तु शब्रूपे विकरणप्रत्यये सति 'शप्श्यनोर्नित्यम्'[37] इति नित्ये नुमि चोरयन्ती इत्येव।

व्याकरणे प्रदर्शितेषु रूपेषु लिङ्गविशेषविवक्षा न केवलं प्रातिपदिकप्रदर्शने एव तात्पर्यम्। शास्त्रेण लिङ्गविशेषनिर्देशपूर्वकं प्रत्ययविधानस्थलेषु तु लिङ्ग विवक्षितमेव। यथा–'नपुसंके भावे क्तः'[38] शक्तिम्, 'स्त्रियां क्तिन्'[39] भूतिः, 'घञजपाः पुंसि (लिङ्गानुशासनम्) भावः इति। एतत् सर्वमनुभवबलेन ज्ञेयम्।

सकर्मकेषु धातुषु 'कर्मण्यण्'[40] इति सामान्येन विहितोऽण्यण् प्रत्ययः प्रयोगबलात् कुम्भकारः इत्यादिषु क्वचिदेव भवति न तु 'आदित्यं पश्यति' इत्यादौ। अत एव 'आदित्यं पश्यति' इत्यादौ कर्मण्यण् कुतो न ? इत्याशङ्क्य 'अनभिधानात्' इत्युक्तं भाष्ये[41] । अत्र कैयटः––'नित्यानां शब्दानामिदमन्वाख्यानमात्रम्। न च आदित्यं पश्यतीत्याद्यर्थप्रतिपादनाय आदित्यदर्शादयः शब्दा लोके प्रयुज्यन्ते इति शास्त्रेणापि साधुतवेन नानुशास्यन्त इत्यर्थः'।

'अज गतिक्षेपणयोः' अस भुवि' चक्षिङ् व्यक्तायां वाचि इत्यादिषु, कुत्रचिदेव प्रत्ययेषु धातुस्वरूपस्योपलब्धिः, कुत्रचित् तत्स्थाने आदेशभूतस्यैवोपलब्धिरित्यादिकं यथाप्रमाणमत्र रूप–प्रदर्शनसमये निरूपयिष्यते।

सामान्यतः पठितानामपि धातूनां कुत्रचित् नियतप्रत्ययविषयका एव प्रयोगा इति भाष्यवचनादवगम्यते। तद्यथा.......यथा अन्यत्राप्यविशेषविहिताः शब्दाः नियतविषया दृश्यन्ते। कान्यत्र ? तद्यथा..... धरतिरस्मै अविशेषेणोपदिष्टः, सः धृतम्, धृणा, धर्म इत्येवंविषयः। रशिरस्मै अविशेषेणोपदिष्टः, स राशिः, रश्मिः रशना इत्येवंविषयः। लुशिरस्मै अविशेषेणोपदिष्टः, स लोष्ट इत्येवंविषयः। इति तृज्वत् क्रोष्टु[42] इत्यत्र भाष्यम्।

एवञ्च पाणिनीयय्याकरणे कृत्प्रत्ययानां स्थानं महत्त्वपूर्णं विद्यते।

**सन्दर्भः**


1. पाणिनीयसूत्रम् –3.1.32।
2. पाणिनीयसूत्रम् –1.3.12 ।
3. पाणिनीयसूत्रम् –1.3.72 ।
4. पाणिनीयसूत्रम् –3.1.131 ।
5. पाणिनीयसूत्रम् –8.3.113 ।
6. पाणिनीयसूत्रम् –7.4.63 ।
7. पाणिनीयसूत्रम् –1.3.10 ।
8. पाणिनीयसूत्रम् –1.3.83 ।
9. पाणिनीयसूत्रम् –6.4.92 ।
10. पाणिनीयसूत्रम् –7.2.76 ।
11. पाणिनीयसूत्रम् –3.2.148 ।
12. पाणिनीयसूत्रम् –3.2.9 ।
13. पाणिनीयसूत्रम् –3.1.91 ।
14. पाणिनीयसूत्रम् –8.4.67 ।
15. पाणिनीयसूत्रम् –3.1.133 ।
16. पाणिनीयसूत्रम् –3.3.10 ।
17. पाणिनीयसूत्रम् –3.3.108 ।
18. पाणिनीयसूत्रम् –वा 3.3.103 ।
19. पाणिनीयसूत्रम् –3.3.109 ।
20. पाणिनीयसूत्रम् –3.2.135 ।
21. पाणिनीयसूत्रम् –3.2.129 ।
22. पाणिनीयसूत्रम् –3.2.102 ।
23. पाणिनीयसूत्रम् –3.4.71 ।
24. पाणिनीयसूत्रम् –3.4.72 ।
25. पाणिनीयसूत्रम् –3.4.76 ।
26. पाणिनीयसूत्रम् –3.3.114 ।
27. पाणिनीयसूत्रम् –3.2.102 ।
28. पाणिनीयसूत्रम् –वा 3.4.71 ।
29. पाणिनीयसूत्रम् –3.3.10 ।
30. पाणिनीयसूत्रम् –3.3.158 ।
31. पाणिनीयसूत्रम् –3.3.167 ।
32. पाणिनीयसूत्रम् –3.4.67 ।
33. पाणिनीयसूत्रम् –3.4.70 ।
34. पाणिनीयसूत्रम् –4.1.6 ।
35. पाणिनीयसूत्रम् –7.1.81 ।
36. पाणिनीयसूत्रम् –7.1.180 ।
37. पाणिनीयसूत्रम् –7.1.81 ।
38. पाणिनीयसूत्रम् –3.3.114 ।
39. पाणिनीयसूत्रम् –3.3.94 ।
40. पाणिनीयसूत्रम् –3.2.1 ।
41. पाणिनीयसूत्रम् –3.2.1 ।
42. पाणिनीयसूत्रम् –7.1.95 ।